# Question Paper Code : 7637

## एम.ए. (चतुर्थ सेमेस्टर) परीक्षा, 2017

## संस्कृत

### वर्ग 'ग' - दर्शन

### द्वितीय प्रश्नपत्रम्

## (पूर्वोत्तर मीमांसे)

समय : घण्टात्रयम् पूर्णाङ्क : 70

**नोट :** पञ्च प्रश्नाः समाधेयाः। प्रथमोः प्रश्नोऽनिवार्यः। प्रत्येकस्मात् वर्गात् एकः प्रश्नोऽवश्यमेव समाधेयः।

1. लघूत्तराणि देयानि : [3x10=30]

(क) धर्म लक्षणं

(ख) को नाम अध्यास ?

(ग) साधन चतुष्टयम्

(घ) स्वाध्यायो अध्येतव्यः

(ङ) निषेधः



http://www.lucknowstudy.com

(च) प्रत्यक्षं पुनर्द्विविधं-जीव साक्षि ईश्वर साक्षि च।

(छ) को वेद ?

(ज) मोक्ष स्वरूपं

(झ) अर्थापत्ति

(ञ) 'सोमेन यागं भावयेत्' कथं मत्वर्थीय लक्षणा।

## प्रथमो वर्गः

2. ससन्दर्भ व्याख्यायताम् : [10]

तथा च सर्वनीय देशे सर्वेषामनुष्ठाने कर्तव्ये सवनीयस्य प्रथममनुष्ठानम्। अश्विनग्रहणानन्तरं हि सर्वनीयदेशः। प्रकृतौ 'आश्विन ग्रहं गृहीत्वा त्रिवृता यूपं परिवीय आग्नेयं सवनीयं पशुमुपाकरोति' इत्याश्विन ग्रहणान्तरं सवनीयो विहित इति साद्यस्क्रेऽप्याश्विन ग्रहणानन्तरं सवनीयो विहिति इति साद्यस्क्रेऽप्याश्विन ग्रहणे कृते सवनीय एवोपस्थितो भवति। अतो युक्तं तस्य स्थानात् प्रथमनुष्ठानमितरयोस्तु पश्चादित्युक्तम्।

3. सहज प्रयुज्यमानेषु प्रधानेषु सन्निपातिनामङ्गानामावृत्यानुष्ठाने कर्तव्ये द्वितीयादि पदार्थानां प्रथमानुष्ठितपदार्थक्रमाद यः क्रमः स प्रवृत्ति क्रमः। यथा प्राजापत्यपश्वङ्गेषु। प्राजापत्या हि 'वैश्वदेवीं कृत्वा



प्राजापत्यैश्चरन्ति' इति वाक्येन तृतीया निर्देशात् सेतिकर्तव्यताका एक कालत्वेन विहिताः। अस्ततेषां तदङ्गानां चोपाकरणनियोजन प्रभृतीनां साहित्यं सम्पाद्यम्। तच्च प्राजापत्यपशूनां सम्प्रतिपन्नदेवता कत्वेन युगपदनुष्ठानादुपद्यते। [10]

## द्वितीयो वर्गः

4. 'ब्रह्मवेद ब्रह्मैव भवति' (मुण्ड. 3/2/9) इत्यादि विधानेषु सत्सु कोऽसावात्मा किं तद् ब्रह्म इत्याकाङ्क्षायां तत्स्वरूपसमर्पणेन सर्वे वेदान्ता उपयुक्ताः - 'नित्यः सर्वज्ञः सर्वगतो नित्यतृप्तो नित्यशुद्धबुद्धमुक्तस्वभावो विज्ञानमानन्दं ब्रह्म इत्येवमादयः। तदुपसानाच्च शास्त्रदृष्टोऽदृष्टो मोक्षः फलं भविष्यतीति। कर्तव्य विध यननुप्रवेशे वस्तुमात्र कथने हानोपादानासंभवात्, सप्तद्वीपा वसुमती, राजासौ गच्छतीत्यदिवाक्यावद्वेदान्तवाक्यानामानर्थवयमेव स्यात्। [10]

5. तथोर्ध्वगतेष्वधोगतेषु च देहवस्सु दुःखतारतम्यदर्शनात्तद्धे तोर धर्मस्य प्रतिषेधचोदनालक्षणस्य तदनुष्ठायिनां च तारतम्यं गम्यते। एवमविद्यादिदोषवतां धर्मा धर्म तारतम्य निमित्तं शरीरोपादानपूर्वकं सुख दुःख तारतम्य नित्यं संसाररूपं श्रुति स्मृति न्याय प्रसिद्धम्। तथा च श्रुतिः - 'न ह वै सशरीरस्य सतः प्रियाप्रिययोपहतिरस्ति' इति यथा वर्णितं संसाररूपमुनवदति अशरीर वा वसन्तं न प्रियाप्रिये स्पृशतः (छान्दो. 8/12/1) इति प्रियाप्रियस्पर्शनप्रतिषेधाच्चोदनालक्षण धर्म कार्यत्वं मोक्षारवस्या शरीरत्वस्य प्रतिषिध्यत इति गम्यते। [10]



http://www.lucknowstudy.com

## तृतीयो वर्गः

6. न चैवमपि यत्र ध्वंसाधिकरणं नित्यं तत्र कथं ध्वंसनाश इति वाच्यम्। तादृशाधिकरणं यदि चैतन्यव्यतिरिक्त, तदा तस्य नित्यत्वमसिद्धम्, ब्रह्मव्यतिरिक्तस्य सर्वस्य ब्रह्मज्ञान - निवर्त्यताया वक्ष्यमाणत्वात्। यदि च ध्वंसाधिकरणं चैतन्यं, तदाऽसिद्धिः, आरोपित-प्रतियोगिक-ध्वंसस्याधिष्ठाने प्रतीयमानस्याधिष्ठानमात्रत्वात्। तदुक्तम् - 'अधिष्ठानावशेषो हि नाशः कल्पित वस्तुनः। इति। एवं शुक्तिरूप्यं विनाशोऽपीदमवच्छिन्नं चैतन्यमेव। [10]

7. कर्तृत्वं च तत्त्दुपादानगोचरापरोक्षज्ञानचिकीर्षा- कृतिमत्वम्। ईश्वरस्य तावदुपादानगोचरापरोक्षज्ञान - सद्भावे च यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद् ब्रह्म नामरुपमन्नं च जायते' इत्यादि श्रुतिर्मानम्। तादृशचिकीर्षा - सद्भावे सोड कामयत बहु स्यां प्रजायेय (तै. 2-6) इत्यादि श्रुतिर्मानम्। तादृशकृतौ च तन्मनोऽकुरुत' इत्यादि वाक्यम्। अन्यथा व्यर्थ विशेषण त्वापत्तेः। अतएव जन्म - स्थिति ध्वंसानामन्यतमस्यैव लक्षणे प्रवेशः। [10]

## चतुर्थो वर्गः

8. मीमांसा-दर्शने अर्थवादः कोऽअस्ति ? संक्षेपेण निरूपयत। [10]

9. 'तत्तु समन्वयात्' सूत्रमिदं व्याख्येयम्। [10]

----- x -----



http://www.lucknowstudy.com